कार्य्योत्पत्तिरर्थप्राप्तेति तदुत्पादस्यार्थमर्य्यादाधीनत्वम् ।

**अर्थमात्र** न॰ अर्थ एव मयूर॰ अवधारणाद्यर्थमात्रशब्देन नित्यस॰ । १अवधारितेऽर्थे । "भोजनाच्छादनाभ्यधिकं स्वल्पमप्यर्थमात्रं न सम्पद्यते" इति ह॰भा॰ । अल्पार्थमात्राशब्देन द्वैत॰ । २अल्पधनांशे स्त्री वृहत्त्वार्थे च मात्राशब्देन । द्वैत॰ ।३धनबाहुल्ये । कथं मयाद्येयमर्थमात्राहर्त्तव्या" महती धनमात्रेत्यर्थः ।

**अर्थवत्** त्रि॰अर्थोऽस्त्यस्य असन्निहितः मतुप् मस्य वः । १अर्थयुक्ते २सार्थके "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" पा॰ । ३प्रयोजनयुक्ते ३फलयुक्ते च "अपसव्य उपेतस्ये दाहिताग्न्याहृतार्थवत् । या॰स्मृ॰ "विरमूत्रोत्सर्गशुद्ध्यर्थं मृदाद्यादेयमर्थवत्" मनुः ४असन्निहितधनवति त्रि॰ । सन्निहिते तु इनि अर्थीत्येव । स च व्यवहारे वादिनि रूढः "ततोऽर्थी लेखयेत् सद्यः प्रतिज्ञातार्थसाधनम्" या॰स्मृ॰ । स्त्रियामुभयत्र ङीप् । ५पुरुषे पु॰ राजनि॰ । अर्थमर्हति अर्थेन तुल्यं क्रिया, अर्थे इव वा वति । ६अर्थार्हे ७अर्थतुल्यक्रियायाम् ८अर्थसदृशे आश्रये च अव्य॰ ।

**अर्थवाद** पु॰ अर्थस्य लक्षणया स्तुत्यर्थस्य, निन्दार्थस्य वा वादः वद–करणे घञ् । १प्रशंसानीयगुणवाचके, २निन्दनीयदोषवाचके च शब्दविशेषे । भावे घञि । ३तत्कथने । अभिधया गौण्या वा वृत्त्या भूतमर्थं वदन् स्वाध्यायविध्यापादित प्रयोजनवत्त्वलाभाय विधिमाकाङ्क्षन्नर्थवादः" अर्थवादेन हि क्वचिद्धि विशङ्कितवस्तुदन्ती विध्यर्थे शीघ्रं प्रवर्त्तयितुमुत्तभ्यते । स च चतुर्विधः "स्तुतिर्निन्दा परकृतिः पुराकल्प इत्यर्थवादः" गौ॰ सूत्रोक्तेः । तत्र स्तुतिः साक्षाद्विध्यर्थस्य प्रशंसार्थकं वाक्यं यथा "सर्व्वस्य जिता वै देवाः सर्वमजयन् सर्वस्य व्याप्त्यै सर्वस्य जित्यै सर्वमेवैतेनाप्नोति सर्वं जयतीत्यादि" । अनिष्टसाधनताद्वारा विध्यर्थप्रवर्त्तकं वाक्यम् निन्दा । यथा "एष वाव प्रथमोयज्ञानां यज्ज्योतिष्टोमः य एतेनानिष्ट्वा अन्येन यजते स गर्त्ते पततीत्यादि" । पुरुषविशेषनिष्ठतया कथनं परकृतिः परक्रिया, यथा "वपामेवाग्रेऽभिघारयन्ति अथ पृषदाज्यं तदुह चरकाध्वर्यवः पृषदाज्यमेवाग्रेऽभिघारयन्त्यग्नेःप्राणाः पृषदाज्यमित्यभिदधतीत्यादि" ऐतिह्यमात्रचरिततया कीर्त्तनं पुराकल्पः । एवमन्येऽपि अर्थवादा ब्राह्मणरूपाः सामसंहिताभाष्ये माधवाचार्य्येण दर्शिताः यथा "हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः । परकृतिः पुराकल्पोयावधारणकल्पना" इति "तेन ह्यन्नं क्रियत" इति हेतुः "एतद्दध्नोदधित्वमिति" निर्वचनम् । "अमेध्या वै माषा" इति निन्दा "वायुर्वै क्षेपिष्ठेति" प्रशंसा" "तद्व्यचिकित्सन् जुहवानीमाहौषामिति" संशयः "यजमानेन सम्मिता औदुम्बरी भवतीति" विधिः "माषानेव मह्यं पचते" इति परकृतिः "पुरा ब्राह्मणा अभैषुः" इति पुराकल्पः । "यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेदिति" विशेषावधारणकल्पनेत्युदाहृतं च तत्रैव । लौगाक्षिणा तु त्रैविध्यमुक्तम् "अर्थवादस्त्रिविधः गुणवादोऽनुवादोभूतार्थवादश्चेति तदुक्तम् ॥ "गुणवादोविरोधे स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" ॥ गुणवादश्च "यथा सिंहो माणवक" इत्यादौ माणवके सिंहाभेदस्य विरोधेन तद्गतदशाभेदोबोध्यते तेन समर्थत्वादिरूपं तद्वृत्तिगुणमनुवदति प्रतिपादयतीति गुणवादः अन्ये तु "यजमानः प्रस्तर" इत्यादौ प्रत्यक्षादिभिरवधारितेऽर्थे तमेवार्थमनुवदतीत्यनुवादः यथा "वह्निर्हिमस्य भेषजं, "भूमिरावपनं महत् सूर्य्यस्तापकर" इत्याहुः । तद्धानादेतदुभयार्थकत्वाभावात् तथा चैतदुभयभिन्नं भूतं सिद्धार्थं वदतीति भूतार्थवादः इति । अयञ्चानेकविधः क्वचिदुक्तः, स्तुत्यर्थवादः फलार्थवादः सिद्धार्थवादः निन्दार्थवादः परकृतिः पुराकल्पः मन्त्रश्चेति" । तत्र स्तुत्यर्थवादो यथा "वायुर्वैक्षेपिष्ठा देवता" इत्यादि ॥ फलार्थवादो यथा "तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजतेत्यादि" । "प्रतितिष्ठन्ति ह वै यएता रात्रीरुपयन्तीत्यादि" च यद्यप्येतस्य परकृतावेव पर्य्यवसानं तथापि फलस्य विशेष्यतयाऽनभिधानात्तादृप्येण पृथगुपन्यासः ॥ सिद्धार्थवादो यथा । "यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् ॥ अभिलाषोपनीतं यत् तत् सुखं स्वःपदास्पदमित्यादि" ॥ निन्दार्थवादो यथा "अन्धन्तमस्ते प्रविशन्ति ये के चात्महनोजना" इत्यादि ॥ परकृतिः परकृत्यभिधानं परक्रियोक्तिः । एवञ्च लौगाक्षिभास्करोक्तस्य" "विरोधेनानुवादः स्यादित्यादि कारिकोक्तस्य त्रैविध्यस्य मध्ये स्तुत्यर्थवादस्यैवावान्तरभेदेन तस्य सप्तविधत्वमिति भेदः । ४ग्रन्थतात्पर्य्यावधारणार्थे लिङ्गषट्कान्तर्गते लिङ्गभेदे च । "उपक्रमोपसंहारावभ्यासोऽपूर्व्वता फलम् । अर्थवादोपपत्ती च हेतुस्तात्पर्य्यनिर्णये इति वे॰सा॰ यथा "उत तमादेशमप्राक्षो" येनाश्रुतं श्रुतम् । इत्यादिनाऽद्वितीयवस्तुनः प्रशंसनम्" छा॰ उ॰ भा॰ उक्तम् ।

**अर्थविज्ञान** न॰ द्वैत॰ शुश्रूषाद्यष्टविधायुक्तधीगुणान्तर्गते गुणभेदे हे॰ ।

**अर्थविद्** त्रि॰ अर्थं कार्य्यं वेत्ति विद–क्विप् । कार्य्याभिज्ञे